# वैदिकयज्ञानामपर्यावरणीयं महत्त्वम्

**बालकृष्ण एम. दवे**
शोधार्थी, संस्कृत विभाग
अपेक्स यूनिवर्सिटी, जयपुर

## अग्निष्टोमस्य पर्यावरणीयंमहत्त्वम्

'अग्निष्टोमः स्वर्गकामो यजेत१' इति मीमांसाशास्त्रीयवचनानुसारं स्वर्गाप्त्यै अग्निष्टोमो विधीयते स्म। अत्र स्वर्गाप्तेस्तात्पर्यमुत्क्रान्त्यनन्तरं प्राणानामूर्ध्व गमनार्थे गृह्यते। यतो हि ऊर्ध्वगमनेनैव प्राणा उत्कर्षमाप्नुवन्ति। मानवानां मानवेतरप्राणिनां च कृतेपि प्राणोत्कर्ष एव बलस्य बुद्धेश्च वृद्ध्यै अपेक्ष्यमाणो भवति। एवं चेदग्निष्टोमः यावज्जीवनमपि प्राणिनां कृते उपकार्येव भवति।

अग्नौ औषधिविशेषाणां होमोग्निष्टोमः। वेदविज्ञानवादिनामाचार्याणां मतानुसारं अग्निष्टोमस्य प्रतिष्ठानम् अग्निरेवास्ति। वस्तुतस्तु अयं यज्ञो वैश्वानराग्ने उपावसर्जनमस्ति। अर्थात् सूर्यरश्मिर्योग्निः पृथिवीं प्रति आयाति सः पार्थिवरश्मिगतेनाग्निनासम्पृक्तोभूत्वावैश्वानराख्यम् अग्निं जनयति। अयं वैश्वानराग्निः अन्तरिक्षे विद्यमानो भवति। अस्मिन् वैश्वानराग्नौ प्राकृतयज्ञः सम्पद्यते। तस्य प्राकृतयज्ञस्य समानान्तरमेव पार्थिवयज्ञेष्वग्निष्टोमो विधीयते।

अनिष्टोमः संवत्सरस्य मुखमस्ति। यस्य तात्पर्यमिदमस्ति यत् संवत्सरस्य पोषणाय संवत्सरारम्भेग्निष्टोमस्य कालः भवति स्म। अयमेव च यज्ञानामपि मुखमस्ति अर्थात् संवत्सरे क्रियमाणानां सर्वेषां यज्ञानां आधारः मूलतोऽयमेव यज्ञो भवति स्म। संवत्सरः वर्षपर्यन्तिकं कालावधिः। वर्षपर्यन्तमस्य यज्ञस्य प्रभावः आकलनीय इत्युपलक्षितं भवति।

अग्निष्टोमेन वायुशुद्धिः - अग्निष्टोमस्य मुख्यं प्रयोजनं भूमण्डलीय – वायोः शुद्धिकरणमस्ति। भूमण्डलीयवायोरन्तिमे स्तरे एव वैश्वानराग्निस्तिष्ठति। यदा पार्थिवाग्नौ ओषधिविशेषाणां हविर्द्रव्याणां होमो विधीयते तदा औषधीनां सूक्ष्मबलं भूवायुना वैश्वानरं प्रयाति।वैश्वानरः तं गृहीत्वा भूवायोः प्रवाहबलं प्रदत्ते

पर्जन्यादिभ्योऽपि आधानबलंप्रदत्ते तेन पर्जन्यानां गर्भधारणं भवति। सुवृष्टिं कर्त्तुं च ते यथाकालं प्रभवन्ति। भूमण्ड्लीयो वायु: वैश्वानरप्रतिक्रियारूपमूर्ज्जास्तरविशेषं गृहीत्वा दिवसारम्भे प्राणस्तरं वर्धापयति४। अवएव च स वायुः प्राणवायुरपि कथ्यते। एष प्राणवायुःनितान्तं विशुद्धो भवति । सर्वे प्राणिन: सूर्योदयात्पूर्वमुत्थायास्यप्राणवायोर्ग्रहणं कृत्वा ज्जस्विनो भवन्ति।

अग्निष्टोमस्यावान्तरंप्रयोजनं लोकप्रतिष्ठास्ति। भूरादयो लोका अग्निष्टोमेन प्रतिष्ठन्ते। तथा हि अग्निष्टोमेनोत्पन्नमूर्ज्जाविशेषं गृहीत्वा भूलोकादूर्ध्वं विविधवायुस्तराणां क्षेत्रं विस्तृतं भवति। तेनान्तरिक्षे रिक्तस्थानेऽपि प्रवहनिवहादिवायूनां प्रभावेण ग्रहनक्षत्राणां गतिः सम्भवति। तयागत्यैव लोका: प्रतिष्ठां भजन्ते।

अग्निष्टोम एवात्माऽस्ति प्राणिनाम्। तात्पर्यमिदमस्ति यत् प्राण्युत्पादनेपि अग्निष्टोमो विशेषरूपेण प्रभावी भवति। यत्र वैश्वानाग्नि: प्रभावशून्यो भवति तस्मिन् क्षेत्रे प्रजोत्पादनक्षमता न्यूनप्राया जायते। अतएव कदाचिद् अनुभूयते यत् क्षेत्रविशेषे जीवजन्तूनां जातिविशेषस्य सुतरामभावोऽभवत्। एवं नास्ति यत् सा जातिर्विनिष्टा किन्तु नैयून्यात् शनै: शनैरुत्पादनं भवति। यदि तस्य क्षेत्रस्य वातावरणं प्रजोत्पादनयोग्यं कर्तुमिच्छेयुस्तदाग्निष्टोमः करणीयः। यतो हि अनिष्टोम एव सर्वासां कामानानां साधक: पूर्णयज्ञोस्ति।

अग्निष्टोमेन ऋतुचक्रप्रवर्तनम्- अग्निष्टोम: सृष्टियज्ञोस्ति। अस्य मूलप्रयोजनं सृष्टिरक्षणमस्ति। एवं चेत् सृष्टिसंरक्षणंयागस्य पर्यावरणस्य निर्माणमेवास्यानुष्ठातृणां प्रयोजनं विज्ञातव्यम् । ताण्डयमहाब्राह्मण-स्योल्लेखानुसारं अग्निष्टोमस्यैव विविधाभिः क्रियाभि: संवत्सरादय: कालखण्डा: मानवादय: प्राणिन:, वसंताद्या ऋतवश्चोत्पद्यन्ते३। ऋतव: कालापेक्षिण्यो भवन्ति प्राणिनश्च ऋत्वपेक्षिणो भवन्ति। एवं त्रयाणाममीषां परस्परं सम्बन्धो लक्षितो भवति। ऋतवो यथाकालं भवेयुरित्यस्य कृते अग्निष्टोमस्यानिवार्यतास्ति। तात्पर्यमिदमस्ति यत् औषधिविशेषहविर्द्रव्याधारिताग्निष्टोमसंपादनाभावे ऋतुचक्रं अनियमितं भवति, तेन जीवोपयोगिपर्यावरणस्य हानिर्भवति। एवमेव प्राणिन: प्रकृत्यरूपं जीवनं जीवितुमानंदमनुभवन्ति इतस्यकृतेपि अग्निष्टोमोनिवार्य:। वर्तमाने अग्निष्टोमाभावेन ऋतुचक्रं नियमितं दृश्यते, न च प्राणिन: प्रकृतौ जीवनं जीवितुं कामयन्ते। आस्यां स्थितौ पर्यावरणोपेक्षा स्वत उपलक्षिता भवति।

**अग्निष्टोम एव सोमयाग:-** यज्ञतत्तवप्रकाशोपलब्धविवरणानुसारं श्रौत यज्ञेषु सोमयागानामाद्यं यागोऽयमग्निष्टोमोस्ति। अतएव चायं सोमयागानां प्रकृतिरप्युच्यते। अत्रानेकेषामिष्टिपशूनामनुष्ठानं भवति।

'पशु'शब्दोऽत्र वनस्पतिवाचकोस्ति। अतएव विविधवनस्पतीनां ग्रहणं क्रियते इत्यर्थो विज्ञातव्यः। तासु वनस्पतीषु सोमो मुख्यवनस्पतिर्भवति। अयमेकाहयागोस्ति। संवत्सरारम्भदिवसेऽस्यानुष्ठानं विधीयते।

अयमग्निष्टोमस्त्रिविध: प्रतिपादित:२। ऋग्वेदीयपरम्परानुसारं अस्यानुष्ठाने विविध वाक्या पुरोनुवाक्या शस्त्र-पुरोगव प्रभृतीनां प्रयोगा: भवन्ति। 'शस्त्र'शब्दोऽत्र प्रशंसकमन्त्राणामर्थे प्रयुक्तोऽस्ति। यजुर्वेदीय परम्परानुसारमस्यानुष्ठाने यजुषां प्रयोगात्पदार्था आपेक्षिकं स्थैर्यम् आपेक्शिकी गतिं च प्राप्नुवन्ति तेन ते जीवनसंचालनयोग्या भवन्ति। सामवेदीयपरम्परानुसारमग्निष्टोमे द्वादश साम्न: प्रयुज्यन्ते। सामगानेन एव विविधा यजनक्रियाः सम्पाद्यन्ते। अन्ते अग्निष्टोमनामकंसाम गीयते, तदाधारेणैव चास्याभिधानमग्निष्टोम विहितम्३।

**अग्निष्टोमस्य वानस्पत्यं महत्वम्**

आहिताग्नयस्त्रैवर्णिका:, वसंतऋतौ अग्निष्टोमं कुर्वन्ति स्म। यतो हि वसन्तकालोऽग्निषोमयोः समत्वकालो भवति। ऋतुराजत्वात् प्रथमर्त्तुगणितत्वाच्च ऋत्वपेक्षया वसन्तस्य ग्रहणं कृतमस्ति। अस्मिन् योगे सोमपानं विधीयते स्म। सोम: औषधिविशेष:। सोमवल्ली इत्युल्लेखात् सोम: सोमवल्ल्या रसो भवतीति विज्ञायते। अयं सोमो एव वनस्पतीनां राजाप्युच्यते। अस्य सोमाख्यवनस्पतेहविर्द्रव्यरूपेण प्रयोगे वनस्पतिषु प्राणिषु चामृताग्न्यंशो वर्धते, तेनऊर्जावृद्धि आयुर्वृद्धिश्च भवतः। अतएव आयुष्यकामास्त्रैवर्णिका: पूर्वं यज्ञ सम्पादनमानन्तरं आत्मकल्याणाय सोमपानमपि कुर्वन्तिस्म। सोमस्तु परोपकाराय सोमपानं च स्वप्रयोजनाय, एवं अग्निष्टोमे प्रयुज्यमान: सोमाख्य औषधिः समेषां कल्याणकरो भवति स्म। कालान्तरे सोमाभावे पूतिकालतायाः उपयोगोऽपि प्राचलत्। एवं वनस्पतीनांयज्ञे उपयोगो हितकर:। अनेन आयु: बलं पुष्टि: मेघा वर्च: आत्मशक्तिश्चवर्धन्ते४।

अत्यग्निष्टोम आनन्तर्येण संवत्सरे विधीयन्ते। अस्य प्रकृतिरग्निष्टोमवत् मन्यते।

**षोडशीयागस्तदीयं पर्यावरणीयं महत्त्वम्**

'यज्ञा यज्ञश्च वोऽग्नये१' इत्यस्य साम्न उच्चारणेन अग्निष्टोमानां यथा समाप्त्या संसूचनं भवति तथैव उक्थ्य-षोडशी-अतिरात्रप्रभृति सोमानां गानेन समाप्त्या एतत्संज्ञकयागानां संसूचनं भवति। षोडशीयागे षोडश स्तोमानां सामगानं विधीयमानं भवति। एवंचेदयमपि सोमयाग एव। षोडशीयागे सोमाभिष्टवं सोमपानं च विशिष्टं मन्यते। अत्र षोडश एवर्त्विजो भवन्ति। कात्यायनः श्रौतसूत्रे षोडशर्त्विजां विवरणं निम्नानुसारंउल्लिखति-

"षोडशर्त्विजो ब्रह्मोदगातृहोत्रध्वर्युब्राह्मणाच्छंसि

प्रस्तोतृमैत्रावरुण- प्रतिप्रस्थातृ- पोतृप्रतिहर्त्रच्छा-

वाक नेष्ट्रग्निघ्रब्रह्मण्यग्रावस्तुदुन्नेतृन् वर्णिते२।"

उपर्युक्तोल्लेखे इमे षोडश ऋत्विज उक्तास्तेषां विवरणं निम्नानुसारंस्पष्टीकर्तुं शक्यते-

**अध्वर्यव:- अध्वर्यु:, प्रतिप्रस्थाता, नेष्टा, उन्नेता च।**

**ब्रह्माण:- ब्रह्मां, ब्राह्मणाच्छंसी, आग्नीघ्र:, पोता च I**

**होतार:- होता, मैत्रावरुण, अच्छावाक, ग्रावस्तुत्।**

**उद्गातार:- उदगाता, प्रस्तोता, प्रतिहर्त्ता, सुब्रम्हण्य।**

एते षोडशार्त्विज: अग्निं सवितारम् अदितिं सोमं च स्तोमै: सन्तोष्य आहुतयः प्रददति। अग्निरादिदेवता वर्तते। अयं हि देवानां नेता। हविर्द्रव्याणि देवान् उपनयति। तेन देवा बलं प्राप्नुवन्ति। देवाश्च सूर्यरश्मयः। सूर्यरश्मयो यदा बलीयांसो भवन्ति तदा ते भूमेः गुरुत्वेन भूमिं प्रति गन्तुं प्रवृत्ता भवन्ति । वैश्वानरं चोत्पादयितुं क्षमन्ते। वषट्कारमण्डलं पारयित्वा त रश्मयः भूलोके लोकानां कल्याणकर्त्र्यो भवन्ति। ता एव जीवनदायिन्यो भवन्ति। तात्पर्यमिदमस्ति यत् जीवनधारणप्रक्रियां सम्पादयितुं तस्यां रश्मीणामुपयोगो भवति।

सविता प्रजापतेरेवान्यतम: स्वरूपमस्ति। सवित्रे यद्धविदीर्यते तेन परमेष्ठिमण्डलं विशुद्धं भवति। तत्र विशुद्धसोमस्योत्पादनं भवति। स सोम एव रस:४। बलेन सह अयमेव रसः ब्रह्माण्डीयपदार्थानामस्तित्वं स्थिरीकरोति एवं ब्रह्माण्डीयं पर्यावरणं स्थापयितुमस्य षोडशीयागस्य महत्ता ऽत्यन्तंप्रशस्या वर्तते।

अदिति स्वयंप्रकृतिरस्ति। द्युलोकादारम्य भूमिं"यावत् सर्वं क्षेत्रमेतदा यत्तं स्वीक्रियते। यथोक्तं श्रुतौ -

**"अदितिर्द्यौरदितिरन्तरिक्षम्**

**अदिति: स माता स पिता स पुत्र:।**

**विश्वेदेवा अदिति: पंचजना:**

**अदितिर्जात मदितिर्जनित्वम्१II”**

प्रकृत्या विशुद्धिकरणमप्यनेन षोड्शीयागेन सम्भवति। आदितये या आहुतय: प्रदीयन्ते ताभिराहुतिभि: यत्सूक्ष्मोर्ज्ज: प्रभवति तेन द्वादशानामादित्यानां परिपोषणं भवति। एते द्वादशादित्याः गैसीयपदार्था: सूर्ये स्थानापन्नाः सन्ति । तेषां बलेन सूर्यो बलमाप्नोति । तदीय प्रकाशनक्षमतायां रश्मिनिस्सरणक्षमतायां चाभिवृद्धिर्नैरन्तर्येणानेन सम्भाव्यते। अयं सूर्यं एवास्माकं प्राणिनां कृते महान् उपकारकरः । अपि च विशुद्धायां प्रकृतौ जीवमानानां जीवानामपि जीवनं सौख्येन सम्पद्यते यतो हि विशुद्धा प्रकृतिरेव विशुद्धं पर्यावरणमुपस्थापयति।

सोमश्चान्तिमो देवः । अयं सोम: जलीयपरमाणुरूपो ब्रह्मणोऽव्यक्तं स्वरूपमात्मन्यादधाति । ब्रह्मरसपरमाणूनां घनीभूतोऽयं सोम एवादिम: पदार्थ: अग्निश्च द्वितीय: पदार्थ:। अग्नि ब्रह्मतेजसोऽपरा परिणतिरस्ति । अयं अग्नि: सोमेन आत्मनि अन्तर्भूतः क्रियते। अस्मादेव जलेऽग्निस्तिष्ठति। जलेन विद्युत् उत्पाद्यते। कदाचिद् अग्नि: सोममात्मनि अन्तर्भूतं करोति । तस्मादेव वाष्पात् जलं प्रभवति। एवं सोमश्चग्निश्च मूलतत्त्वे स्तः। आभ्यामेव जगदुत्पद्यते इति वैदिका आमनन्ति। श्रुतावप्युक्तम्- अग्नीषोमात्मकं जगत्।

पार्थिवपर्यावरणे अग्नीषोमयोरेव प्रभावो बलीयान्भवति। यदा अग्निं क्रमशो वर्धते तदा सोम: क्रमेण कार्श्यमापद्यते। यदा सोमः क्रमशो वर्धते तथा अग्निः क्रमेण कार्श्यमादत्ते। एवं शीत उष्णश्चेत्यनुभूयेते। वृष्टिरप्यनयोरेवाधारिताऽस्ति । सोम एव पृथिव्यां जलरूपे परिणतो भवति। स एव उष्णर्त्तौ सूर्यरश्मिभिरवशोष्यते । स एव पर्जन्यमाभरति यथा कालं च वर्षति। तेनैव प्राणिनां महदुपकारः सम्भवति। एवं मूलतः सोमस्य महती भूमिका वर्तते । तस्माच्च सोमयागरूपेण षोडशीयागस्य पर्याप्तमुपयोगिता लक्ष्यते यतो हि प्रकृतिशुद्धिरनेन सम्भवति परिशुद्धं पर्यावरणं च तेनोपलभ्यते।